वस्यत्वासवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णोहस्ताभ्यां प्रतिगृह्णा-
मि यशसे ब्रह्मवर्चसाय" इत्यनेन मन्त्रेण गृहीत्वा सव्ये पाणौ कृत्वा
"वसवस्त्वाग्निराजानो भक्षयंत्वि"त्यनेन मन्त्रेणाऽनामिकांगुष्ठाभ्यां
पूर्वार्द्धात् गृहीत्वा पूर्वार्द्धे कांस्यस्यैव निलिम्पति । पुनर्द्विस्तूष्णी-
मेवं सर्वासु दिक्षु । अपसव्यं कृत्वा "पितरस्त्वायमराजानोभक्षय-
न्तु" इत्यनेन मन्त्रेण दक्षिणार्द्धाद्गृहीत्वा दक्षिणार्द्धे निलिम्पति ।
ततो यज्ञोपवीती भूत्वा उदकं स्पृष्ट्वा "आदित्यास्त्वा वरुणराजा-
नोभक्षयन्त्वि"त्यनेन मन्त्रेण पश्चिमार्द्धादगृहीत्वा पश्चिमार्द्धे कांस्य-
स्य निलिम्पति । "रुद्रास्त्वेन्द्रराजानोभक्षयन्त्वि"त्यनेन मन्त्रेण
उत्तरार्द्धादृगृहीत्वा उत्तरार्द्धे कांस्यस्य लिम्पति उदकं स्पृष्ट्वा "वि-
श्वेत्वादेवाः प्रजापतिराजानोभक्षयन्त्वि"त्यनेन मन्त्रेण मध्याद्-
गृहीत्वार्द्धमुत्क्षिप्य ततो महाव्याहृतिभिस्तिसृभिरेकैकया प्राश्य
ततः समस्ताभिर्महाव्याहृतिभिः स्तोकं पीत्वाऽब्राह्मणायोच्छिष्टं द-
द्यात् । सर्वं वा पिबेत् । उदके वा क्षिपेत् । तत आचम्य "शंनोदेवी-
रभिष्टय" इत्येताभिश्चतसृभिरुरोभिमृश्योदकं स्पृष्ट्वा "प्राणपा
असिप्राणंमेपाहि" इत्यनेन मन्त्रेण नासिके मुखं च युगपत् स्पृ-
शति । "चक्षुष्पाअसिचक्षुर्मेपाहि" इत्यनेन मन्त्रेण चक्षुषी स्पृ-
शति । "श्रोत्रपाअसिश्रोत्रंमेपाहि"इत्यनेन मन्त्रेण श्रोत्रे स्पृष्ट्वा
ततः "अनुनोमार्ष्टुतन्वोयद्विलिष्ट"मित्यनेन मन्त्रेण मुखं विमार्ज-
यति । अथ वा "समिन्द्रणोमनसानेषिगोभि" रित्त्येका ऋक् "सं-
वर्चसापयसासन्तनूभिरगन्महिमनसाशिवेन त्वष्टासुदत्रोविदधातुरा-
य" इति च मन्त्राभ्यां प्राणसंमर्शनं कुर्यात् । मुखविमार्जनं तु समान-
मेव । ततस्तावत्तिष्ठेद्यावत्कन्यावित्तकेन गौरिति त्रिरुक्तभूतो
जामाता बधार्थमानीतायां गवि ॐकुरुतेतिबधार्थमनुज्ञां द-
दाति । ततः कन्यावित्तकेन मित्रदैवत्यः शाखापशुः कर्त्त-

चक्षते। "सत्यञ्च श्रद्धाञ्चे"त्येको मन्त्रः एतावता मन्त्रेण पुनरावृत्तेन पूर्वद्वारे यथोक्तेन क्रमेण स्थूणाद्वयमित्यभिमृशेत्। एवं सर्वासु दिक्षु मन्त्रद्वयं समभ्यस्य स्थूणानामभिमर्शनं कर्त्तव्यं मन्त्राश्चाकारान्ताः कर्त्तव्याः। एवमन्यतरेऽभिमर्शने निवृत्ते "श्रीस्तूप" इत्यनेन मन्त्रेण गृहमध्य एव स्थूणाकारं क्रियते तमभिमृशेत्। "अहोरात्रे" इत्यनेन मन्त्रेण पुनरावृत्तेन द्वारदेशे अभिमृशेत्। "संवत्सर" इत्यनेन मन्त्रेण द्वारि पिधानमभिमृशेत्। "उक्षासमुद्रोअरुषः सुपर्ण" इत्यनेन मन्त्रेण घृताभ्यक्तं पाषाणं स्तूपस्याधस्तान्निखनति॥

गृहप्रवेशकर्म वक्ष्यामः। अत्र स्तरणाघाराज्यभागाः पाक्षिकाः। आवसथ्याग्नौ उपलेनोल्लेखनाभ्युक्षणानि कृत्वा "अग्निंप्रणयामि मनसा शिवेनायमस्तु सङ्गमनो वसूनां माहिंसीस्थविरं माकुमारं शंनोभवद्विपदेशञ्चतुष्पदे" इति मन्त्रेण एकारान्तेनाग्निं नवगृहे द्वारे बाह्यतः प्रणीय समूहनं कृत्वोत्तरतोऽग्नेः प्रागग्रेषु नवेषु कुशेषूदकुम्भं नवं प्रतिष्ठाप्य "आपोहिष्ठामयोभुव" इत्येताभिस्तिसृभिरद्भिः पूरयित्वा "अरिष्टास्माकंवीरा मापरासेचिनोधेन" मित्यनेन मन्त्रेण तमुदकुम्भमभिमन्त्र्य पाक्षिकमाघाराज्यभागान्तं कृत्वा ततः "अभित्वा शूरनोनुम" इति ऋचं पूर्ववत्तिस्रः कृत्वा स्वाहाकारान्तैस्तिस्र आहुतीः पूर्वाह्णे हुत्वा ततः पाक्षिकस्विष्टकृत्ततो महाव्याहृतिसर्वप्रायश्चित्तादि तन्त्रशेषं समाप्य ततो मध्याह्ने तस्मिन्नेवाग्नौ समूहनाद्यारभ्य पाक्षिकमाघाराज्यभागान्तं कृत्वा ततः "कयानश्चित्रआभुव" दितितृचेन प्रत्यृचं स्वाहाकारान्तास्तिस्र आज्याहुतीर्हुत्वा ततः पाक्षिकस्विष्टकृत्ततो महाव्याहृतिसर्वप्रायश्चित्तादितन्त्रशेषं समाप्य ततोपराह्णे तस्मिन्नेवाग्नौ कर्म भवति। तद्वक्ष्यामः। अत्र

